दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-118 | 1 | फरवरी 26, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ वसन्त-ऋतुः सूर्यः उत्तरायणः फाल्गुणः कृष्णत्रयोदशी- चतुर्दशी तिथिः फाल्गुणः 15 प्रविष्टांशः मङ्गलमयः भवेत्

2 अन्ताराष्ट्रीयः शिवरात्रिमहोत्सवः: मध्यमवृष्टौ लघ्वीकाशीं मण्डीं प्राप्तवान् बड़ादेवकामरुनाग

3 संस्कृतविद्यास्थानानि- ५१ ज्यौतिषस्य त्रयः स्कन्धाः-

4 पशुपतिनाथधामे महाशिवरात्रिः उत्सवः



## प्रधानमन्त्रिणा गुवाहट्यां एडवांटेज असम इत्यस्य निवेशावसंरचना-शिखरसम्मेलनस्य उद्घाटनं कृतम्

**हिमसंस्कृतवार्ताः।** प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना गुवाहट्यां एडवांटेज असम इत्यस्य निवेशावसंरचना-शिखरसम्मेलनस्य उद्घाटन-सत्रं सम्बोधयता प्रोक्तं यत् असमराज्यम् अधुना असीमितसम्भावनायाः केन्द्रं, दक्षिण-पूर्व-एशियाक्षेत्रस्य भारतस्य च प्रवेशद्वारम् अस्ति। राजनयिकानां, प्रमुखोद्योगपतिनां, विदेशिप्रतिनिधीनां च एकां बृहत्तमसभां सम्बोधयन् प्रधानमन्त्री प्रोक्तवान् यत् असमराज्यम् पूर्वभारतस्य विनिर्माण-केंद्रं भविष्यति अपि च तेन अस्य रणनीतिकस्थानस्य लाभः समावाप्तुं उद्योगपतिनः अभ्यर्थिताः सन्ति । प्रधानमन्त्रिणा प्रोक्तं यत् तस्य सर्वकारः सम्पर्कावसंरचनायां संशोधनं कर्तुं अस्मिन् क्षेत्रे स्थानीयापूर्ति-श्रृंखलाः सुदृढं कर्तुं च कार्य करोति ।



भारतं न्यूनतममूल्यकायै विनिर्माण-प्रक्रियायै अभिनस्तरीय कार्य कुर्वद् अस्ति । प्रधानमंत्री पुनः प्रोक्तवान् यत् असमराज्ये न्यायिक व्यवस्थायाः स्थितिः सुदृढा जाता अस्ति । विगतेषु केषुचित् वर्षेषु केंद्र-राज्य-सर्वकाराभ्यां अनेके शांति-प्रस्तावाः हस्तक्षरिताः सन्ति । असमस्य राज्यपालः, एलपी. आचार्य, विदेशमंत्री एस. जयशंकरः, मुख्यमंत्री हिमंत-बिस्वा-सरमा, केंद्रीय-पत्तन-नौवहन-जलमार्ग-मंत्री, सर्बानंद सोनोवालः, केंद्रीय मंत्री, ज्योतिरादित्य सिंधिया, एकषष्टि-राजनयिकाः, विविधदेशानां व्यापार-प्रतिनिधिमण्डलानि, उद्योग-विशेषज्ञाः च अस्मिन् सत्रे भागं भजितवन्तः । केंद्रीय सूचना-प्रसारण मंत्री अश्विनी वैष्णवः अपि अस्मिन् शिखरसम्मेलने भागं भजितवान् ।

**सुभाषितम्**

पितृमातृसमं लोके,
नास्त्यन्यद्दैवतं परम्।
तस्मात् सर्व प्रयत्नेन,
पूजयेत् पितरौ सदा।।

हिन्द्यर्थः- इस संसार में माता पिता के समान श्रेष्ठ अन्य कोई देवता नहीं है अतः सदैव सम्यक् प्रकार से अपने माता पिता की पूजा करनी चाहिए।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876633263 Watsapp

## संयुक्त-राष्ट्र-सुरक्षा-परिषदा रूस-यूक्रेन-देशयोः मध्ये स्थायि शान्तेः

### आग्रहपूर्वकं अमेरिकायाः प्रस्तावः स्वीकृतः

हिमसंस्कृतवार्ताः। संयुक्त-राष्ट्र-सुरक्षा-परिषदा यूक्रेन-संघर्षः त्वरया समाप्तुं रूस-यूक्रेन-देशयोः मध्ये स्थायि शान्तेः आग्रहपूर्वकं अमेरिकायाः प्रस्तावः स्वीकृतः अस्ति। प्रस्तावस्य पक्षे निर्विरोधानि दश-मतानि प्राप्तानि । फ्रांस्, ब्रिटेन, डेनमार्क, ग्रीस, स्लोवेनिया चेत्यादयः पञ्चदेशाः अनुपस्थिताः आसन्। प्रस्तावे पुनरुच्चारितम् अस्ति यत् संयुक्त राष्ट्रस्य प्रमुखोद्देश्यम् अन्तराष्ट्रिय-शांतिं सुरक्षां च सुनिश्चित्य विवादानां शांतिपूर्वकं समाधानसंधानम् अस्ति । संयुक्त राष्ट्र संयुक्त-राज्यामेरिकायाः कार्यवाहक राजदूतः, डोरोधीशीया इति एषः परिषदं प्रोक्तवान् यत् एषः प्रस्तावः शान्ति-सन्धिम् अतिरिच्य, शांतिमार्गम् अस्ति ।

## देहल्याः सर्वकारीयकोषे द्विसहस्रकोटिरूप्यकाणां राजस्वेत्यस्य हानिः-कैगप्रतिवेदनम्



**हिमसंस्कृतवार्ताः।** आम आदमी पार्टीति दलस्य सर्वकारस्य मद्यनीत्या सह सम्बद्धे भारतस्य नियन्त्रक-महालेखापरीक्षक-कैग् इत्यनेन प्रकाशितप्रपत्रे प्रकाशितम् अस्ति यत् नीत्याः कारणेन सर्वकारीयकोषे द्विसहस्रकोटिरूप्यकाणां राजस्वेत्यस्य हानिः अभवत्। दिल्ल्याः मुख्यमन्त्री रेखागुप्ता दिल्लीविधानसभायां प्रस्तुते प्रतिवेदने दिल्लीनगरे मद्यापूर्तेः निरीक्षणं विनियमनं च नगरस्य आबकारीविभागेन कृताः नैकाः विसंगतयः प्रदर्शिताः। तत्र ज्ञातम् यत् विभिन्नेभ्यः विक्रेतृवर्गेभ्यः अनुज्ञापत्रप्रदाने नियमानाम् उल्लङ्घनं जातम्। तत्र उक्तं यत् विभागेन विभिन्नप्रकाराणां अनुज्ञापत्राणि प्रदाने आबकारीनियमैः सम्बद्धानां विविधानां आवश्यकतानां पुष्टिं विनैव अनुज्ञापत्रं प्रदत्तम्। कैग इत्यनेन प्रतिवेदने अपर्याप्तगुणवत्तानियन्त्रणस्य विषयः अपि प्रदर्शितः।

### आमआदमी पार्टीति दलस्य द्वादश-विधायकाः निलम्बिताः

आमआदमी पार्टीति दलस्य द्वादश-विधायकाः, येषु अतिशी, गोपालरायः इमरान हुसैनः, विशेष रविः च सम्मिलिताः सन्ति, ते दिल्ली विधानसभासत्रस्य प्रचलितानां त्रयाणां उपवेशनानां कृते निलम्बिताः सन्ति। विधानसभायां उपराज्यपालस्य विनयकुमारसक्सेनावर्यस्य सम्बोधनावधी तेषां अमर्यादितव्यवहारस्य कृते निलम्बनं जातम्।

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## राष्ट्रपतिः देशे स्वास्थ्यसेवायाम् अधिकसंशोधनस्य विषये बलं दत्तवती

राष्ट्रपतिः द्रौपदी मुर्मु देशे उत्तमचिकित्सासौविध्यानां विकेन्द्रीकरणे, स्वास्थ्यसेवायां च अधिकसंशोधनस्य विषये बलं दत्तवती। राष्ट्रपतिः पटना-नगरस्य बापूसभागारे पटना-चिकित्सा-महाविद्यालय-चिकित्सालयस्य च शताब्दी-उत्सव-समारोहं सम्बोधयन्ती आसीत् । राष्ट्रपतिः प्रोक्तवती यत् यदि लघुनगरेषु चिकित्सासुविधाः उपलभ्यन्ते तर्हि बृहत्संस्थासु कार्यभारं न्यूनीकरिष्यते। एआइ तथा रोबोटिक्स इत्युभयोः प्रौद्योगिक्योः उपयोगेन रोगिणां चिकित्सायां स्पष्टता क्षमता च वर्धते। राष्ट्रपतिः प्रसन्नतां प्रकटितवती यत् पटना-चिकित्सा-महाविद्यालय-चिकित्सालयः च प्रायः सार्द्धपञ्चसहस्रतोप्यधिकशय्यायुतं विश्वस्य द्वितीयं बृहत्तमं चिकित्सालयं विकसितं भवति।

## भारत-ऋतु-विभागेन

### देशस्य पूर्वोत्तरक्षेत्रेषु च वृष्टेः पूर्वानुमानम् प्रकटितम्



भारत-ऋतु-विभागेन आगामि दिनद्वयोः पश्चिमहिमालयीय पर्वतेषु, देशस्य पूर्वोत्तरक्षेत्रेषु च वृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। ऋतु विभागस्य वरिष्ठवैज्ञानिकः डॉ. सोमा सेन रायः प्रोक्तवती यत् आगामिषु द्वि-त्रि-दिनेषु देशस्य पश्चिमीयतटे तापमानं अधिकं भवितुं शक्नोति । तत्रैव हिमाचलप्रदेशे पुनः गतमंगलवासरात् वृष्टिमयं वातावरणम् अस्ति किञ्च पर्वतीयेषु क्षेत्रेषु हिमपातः अभवत्।

## सज्जनकुमाराय सिक्खविरोधिदङ्गेषु आजीवनकारावासस्य दण्डः

१९८४ तमे वर्षे सिक्खविरोधिदङ्गानां समये सरस्वतीविहारक्षेत्रे द्वयोः जनयोः हत्यासम्बद्धे प्रकरणे दिल्लीनगरस्य विशेषन्यायालयेन मंगलवासरे पूर्वकाङ्ग्रेससांसदाय सज्जनकुमाराय आजीवनकारावासस्य दण्डः दत्तः। सांसद/विधायकप्रकरणानाम् विशेषन्यायाधीशः कावेरी बावेजा अभियोजनपक्षस्य रक्षाधिवक्तुः च तर्कं श्रुत्वा आदेशं घोषितवान्। १२ फेब्रुवरी दिनाङ्के न्यायालयेन सज्जनकुमारं भारतीयदण्डसंहितायां विविधधाराणाम् अन्तर्गतं दण्डनीयानाम् अपराधानां कृते दोषी इति निर्णीतम् आसीत् । दण्डस्य क्वाण्टम् विषये तर्कं श्रुत्वा न्यायालयेन निर्णयस्य घोषणार्थं २५ फेब्रुवरी दिनाङ्कस्य विषयः सूचीकृतः आसीत्

# अन्ताराष्ट्रीयः शिवरात्रिमहोत्सवः: मध्यमवृष्टौ लघ्वीकाशीं मण्डीं प्राप्तवान् बड़ादेवकामरुनागः



**हिमसंस्कृतवार्ताः - लघ्वीकाशी मण्डी।** बड़ाकामरुनागस्य मण्डी-प्रवेशद्वारं पुलघराटं प्राप्तमात्रेण अन्तर्राष्ट्रीयमहाशिवरात्रिमहोत्सवस्य दिव्यक्रियाः आरब्धाः सन्ति । मंगलवासरेप्रशासनस्य पक्षतः जिलाराजस्वाधिकारी हरीशः, तहसीलदारः एवं सर्वदेवतासेवा- समितेः अध्यक्षः शिवपालः शर्मा देवकामरुनागस्य भव्यं स्वागतम् अकुर्वन्। तदनन्तरं देव कामरुनागः राजदेवतामधोरायस्य मन्दिरं प्राप्तवान् । महाशिवरात्रि महोत्सवस्य आयोजनं 27 फरवरीतः 5 मार्चपर्यन्तं भवति। अस्मिन् मण्डलस्य २१६ देवी-देवताः आमन्त्रिताः सन्ति । महोत्सवस्य औपचारिकम् उद्घाटनं मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः फरवरी २७ दिनाङ्के भविष्यति। सः भव्यशोभायात्रायां अपि भागं ग्रहीष्यति। तदनन्तरं सः पड्डुले जनसामान्यं सम्बोधयिष्यति। महाशिवरात्रिमहोत्सवे तिस्रः शोभायात्राः भवन्ति। प्रथमायां शोभायात्रायां मुख्यमंत्री अन्तिम-तृतीय-शोभायात्रायां च राज्यपालः भागं ग्रहीष्यति । सः अस्य उत्सवस्य औपचारिकरूपेण समापनम् करिष्यति। उपायुक्तः अपूर्वदेवगनः अवदत् यत् महाशिवरात्रिमहोत्सवे बड़ादेवकमरुनागस्य आगमनेन दिव्यकार्यस्य आरम्भः भवति। अन्यदेवी-देवतानाम् आगमनम् अपि उत्सवे आरब्धम् अस्ति । देव-देव्याः आशीर्वादेन उत्सवस्य सफलतया आयोजनं भविष्यति इति विश्वासः अस्ति ।

## मुख्यमन्त्री राज्यस्य जनेभ्यः शिवरात्रे शुभकामनाः अयच्छन्

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः महाशिवरात्रिमहोत्सवस्य अवसरे राज्यस्य जनान् अभिवादनं कृतवान्। मुख्यमन्त्री उक्तवान् यत् महाशिवरात्रिमहोत्सवः राज्ये आचरितेषु प्रमुखेषु उत्सवेषु अन्यतमः अस्ति। अस्मिन् अवसरे जनाः पारम्परिकरीत्या शिवस्य पूजां कुर्वन्ति । अस्मिन् उत्सवे अपि परस्परं सौहार्दस्य प्रचारः भवति । अयं उत्सवः राज्यस्य जनानां जीवने सुखं समृद्धिं च आनयिष्यति इति सः कामयते स्म ।

# NHPC SPORTS SCHOLARSHIP:

## क्रीडकानामुपरि धनवर्षा, एनएचपीसी प्रतिमासं सहस्राणां मूल्यस्य छात्रवृत्तिः दास्यति; १६ क्रीडाछात्रवृत्तिः सूचौ




**हिमसंस्कृतवार्ताः - शिमला।** एनएचपीसी क्रीडा छात्रवृत्तियोजनायाः अन्तर्गतं १६ क्रीडासु प्रतिभाशालिभ्यः युवभ्यः छात्रवृत्तिः प्रदास्यति। फुटबॉल, कबड्डी, हॉकी, मुक्केबाजी, तीरंदाजी, एथलेटिक्स, शूटिंग, क्रिकेट, तरणं, कुश्ती, वॉलीबॉल, ब्रिज, टेबल टेनिस, शतरंज, बैडमिण्टन, पैरा स्पोर्ट्स इत्येतेषां कृते पात्र-आवेदकानां कृते ऑनलाइन आवेदनपत्राणि आमन्त्रितानि सन्ति। अस्याः छात्रवृत्तेः उद्देश्यं १४ तः १९ वर्षाणां (पैराक्रीडायाः कृते १४ तः २४ वर्षाणि) आयुवर्गस्य युनां क्रीडकानां प्रतिभां प्रोत्साहयितुं, शिक्षायाः प्रारम्भिकवर्षेषु क्रीडायाः कृते सज्जीकर्तुं च अस्ति। उपर्युक्तासु १६ क्रीडासु अधिकतमं ३२ छात्रवृत्तयः दीयन्ते। आवश्यकमापदण्डेषु उपयुक्ताः आवेदनेषु एलिट स्कॉलर तथा स्कॉलर इति द्वयोः वर्गयोः छात्रवृत्तिः प्रदत्ता भविष्यति। एषा छात्रवृत्तिः वर्षत्रयपर्यन्तं प्रदत्ता भविष्यति। एलिटस्कालर-इत्यस्मै प्रथमवर्षे प्रतिमासं १२,००० रूप्यकाणि, द्वितीयवर्षे १३,००० रूप्यकाणि, तृतीयवर्षे प्रतिमासं १४,००० रूप्यकाणि च छात्रवृत्तिः प्रदत्ताः भविष्यन्ति। स्कालर इत्यस्मै प्रथमवर्षे प्रतिमासं ९,००० रुप्यकाणि, द्वितीयवर्षे १०,००० रूप्यकाणि, तृतीयवर्षे प्रतिमासं ११,००० रूप्यकाणि च छात्रवृत्तिं प्राप्स्यति। एतदतिरिक्तं अन्ये केचन लाभाः अपि प्रदत्ताः भविष्यन्ति। एनएचपीसी जनसंपर्कपदाधिकारी श्रीनिवासः अवदत् यत् छात्रवृत्तेः विषये विवरणं एनएचपीसी इत्यस्य कैरियरकोणे वेबसाइट www.nhpcindia.com इत्यत्र उपलभ्यते। ऑनलाइन आवेदनस्य अन्तिमतिथिः २६ मार्चः भविष्यति।

# हिमाचलप्रदेशस्य मुख्यमन्त्री प्रयागराजं प्राप्तवान्, सपत्नीकं स्नानं च कृतवान्



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः आस्थास्नानार्थं बृहत्तमं महाकुम्भप्रयागराजं प्राप्तवान्। सः सपरिवारेण सह धार्मिकं स्नानं कर्तुं संगमं प्राप्तवान्। अस्मिन् काले महाकुम्भविषये पत्रकाराणां प्रश्नानाम् उत्तरमपि दत्त्वा महाकुम्भः अस्माकं संस्कृतेः प्रतीकं, एतस्याः संस्कृतेः उत्सवस्य आस्थास्तम्भः च अस्ति तथा च अस्माभिः परिवारेण सह एतत् पवित्रं स्नानं कर्तुम् अवसरः प्राप्तः इति उक्तवान्, यस्य कारणात् वयं बहु प्रसन्नाः स्मः। यदा पत्रकारैः पृष्टं यत् महाकुम्भस्य चर्चा सम्पूर्णे विश्वे भवति? अस्मिन् विषये मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् भारतस्य संस्कृतिः हिन्दुत्वं च पूर्वमेव प्रसिद्धम् अस्ति, अद्यत्वात् न अस्ति। इतिहासस्य पृष्ठानि पुनः पश्यन्ति चेत् अस्माकं संस्कृतिः परम्पराः च पूर्वमेव प्रसिद्धाः इति अवगमिष्यन्ति।

# अग्नि-एनओसी इत्यस्य कठोरप्रावधानेभ्यः उद्योगाः आश्रयं प्राप्तुं शक्नुवन्ति मुख्यसचिवः आश्वासितवान्



हिमसंस्कृतवार्ताः - शिमला। राज्ये उद्योगाः अग्नि- एनओसी इत्यस्य कठोरप्रावधानेभ्यः आश्रयं प्राप्तुं शक्नुवन्ति। भारतीय उद्योगसङ्घस्य वार्षिकसम्मेलने मुख्यसचिवः प्रबोध सक्सेना उद्योगिनां आग्रहेण आश्रयं दातुम् आश्वासनं दत्तवान्। मार्चमासे आयोज्य सभायां अस्य विषये निर्णयः भविष्यति। मुख्यसचिवेन अतिरिक्तमुख्यसचिवं आर.डी.नाजिम इत्यस्मै उद्योगिनां समस्यानां समाधानार्थं मध्यस्थतां कर्तुं निर्देशः अपि दत्तः अस्ति। सीआईआई प्रतिनिधिः वदन्ति यत् सर्वकारेण सर्वेषां श्रेणीनां उद्योगानां कृते अग्नि- एनओसी इत्यस्य समानः नियमः कार्यान्वितः अस्ति। एमएसएमई-अन्तर्गतं सूक्ष्म-लघु-मध्यम-उद्यमानां कृते एकः मानकः निर्धारितः अस्ति । उद्योगानां कृते एकलक्षसेटकस्य जलभण्डारस्य निर्माणं अनिवार्यं कृतम् अस्ति । ५०० वा १००० वर्गमीटर् व्यासस्य भूखण्डे एतादृशानां भण्डाराणां निर्माणं कठिनम् अस्ति । राष्ट्रीयभवनसंहितायां भवनानां वर्गीकरणस्य प्रावधानम् अस्ति । अस्य अन्तर्गतं अग्निसंवेदनशीलतायाः आधारेण उद्योगानां वर्गीकरणं कृत्वा अपि आश्रयं दातुं शक्यते । अग्नि एनओसी इत्यस्य अभावात् उद्योगानां पञ्जीकरणं नवीनीकरणं न भवति तथा च एतत् एव न, संयन्त्रबीमायाः अभावात् उद्यमिनः अपि व्याकुलाः सन्ति।


## महाकुंभ-मेलक-क्षेत्रस्य चतुर्थे संविभागे निर्मितम् अन्तर्जालानुभव-केंद्रम् प्रमुखम् आकर्षणम् अस्ति



**हिमसंस्कृतवार्ताः।** प्रयागराजे समनुष्ठीयमाने महाकुम्भे पञ्चाशत्-सहस्राधिक-त्रिलक्षतः अधिकाः भक्ताः अन्तर्जालानुभव-केंद्रम् इत्यस्य यात्रां विहितवन्तः सन्ति। आध्यात्मिकता नवाचारेण सह संप्रयुज्य, एतत् केन्द्रम् आधुनिक-तन्त्रज्ञान-माध्यमेन प्राचीन-पौराणिक कथाः पुनर्जीवितं करोति । राष्ट्रपतिना द्रौपदी-वर्यया भूटाननरेशेण जिग्मे-खेसर-नामग्याल इत्यनेन चापि अस्य प्रशंसा कृता अस्ति सहैव ताभ्यां अस्मिन् अन्तर्जालानुभव-केंद्रे महाकुंभस्य भव्यता रसास्वादिता अस्ति। महाकुंभ-मेलक-क्षेत्रस्य चतुर्थे संविभागे निर्मितम् अन्तर्जालानुभव-केंद्रम्, विशिष्टाध्यात्मिककार्यक्रमे एकं प्रमुखम् आकर्षणम् अस्ति । अनेन विशिष्ट-रूपेण युवागंतुकाः अन्तराष्ट्रिय पर्यटकाः च आकर्षिताः सन्ति, येन पञ्चसप्ततिलक्षाधिक-एककोटि-रूप्यकाणां राजस्वं समुत्पन्नम् अस्ति । उत्तर-प्रदेशस्य मुख्यमन्त्रिणा योगिवर्येण अन्तर्जालानुभव-केंद्रम् प्रशंसयता एतत् परम्परा-प्रोद्योगिक्योः मध्ये सेतुरूपेण इंगितम् अस्ति। श्रीआदित्यनाथः प्रोक्तवान् यत् अनेन भारतीयाः सनातन-संस्कृतेः परिचयप्राप्ति प्रति प्रोत्साहिताः भवन्ति । आस्थायाः भविष्यस्य नवाचारस्य च स्वकीयेन निर्बाधमिश्रणेन सह, केन्द्र सफलतापूर्वकं लक्षाधिकेभ्यः भक्तेभ्यः दिव्यं भव्यं च अनुभवं प्रदास्यति, येन महाकुंभः वास्तविकरूपेण ऐतिहासिकः सञ्जातः अस्ति ।

किरण सुमन (राजस्थान), शिक्षिका
मीमांसा-संस्कृत-अकादमी

## महाशिवरात्रि शिवस्तुति-गीतम्



(रागः – भैरवी, तालः – रूपकः / त्रितालः, छन्दः – अनुष्टुप्, शैली – स्तोत्रगीतम्)

नीलकण्ठ नमस्तुभ्यं,
शम्भो भक्तार्तिहारिणे।
गङ्गाधर त्रिनेत्राय,
विश्वनाथाय ते नमः॥१॥
भस्माङ्गरागसंयुक्तं,
व्याघ्राजिनविभूषितम्।
योगिनां योगराजं तं,
पशुपालं नमाम्यहम्॥२॥
डमरुध्वनिनिर्घोषैः,
कण्ठस्थप्रणवान्वितम्।
यस्य नेत्राग्निज्वाला,
दग्धा त्रिपुरसञ्चयः॥३॥
चन्द्रार्धशेखरं शम्भुं,
नागयज्ञोपवीतिनम्।
कालान्तकं करालं च,
वन्दे भूतपतिं विभुम्॥४॥
कालकूटं सदा पीत्वा,
लोकानुग्रहकारिणम्।
शरणं ते हरं वन्दे,
सर्वव्याधिविनाशिनम्॥५॥
सत्यं शिवं च सुन्दरं,
रुद्राक्षाभरणं विभुम्।
योगिनां योगनाथं तं,
शंकरं प्रणमाम्यहम्॥६॥
शिवशक्तिस्वरूपं तं,
गङ्गाधरं जगद्गुरुम्।
त्र्यम्बकं लोकनाथं च,
नमामि परमेश्वरम्॥७॥

## महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः

(Sanskrit Version of Hindi song –




महादेवा ओ महादेवा -")

महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः
महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः---- (००)
महादेवा ओ महादेवाः,महादेवा ओ,
महादेवा ओ महादेवाः,चन्द्रासूर्यं सृष्ट्वा,
शिवा मे ही महादेवाः,शिवा मे ही महादेवाः
महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः---- (०१)
महादेवा ओ महादेवाः,महादेवा ओ
महादेवा ओ महादेवाः,धराकाशं सृष्ट्वा,
शिवा मे ही महादेवाः,शिवा मे ही महादेवाः
महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः---- (०२)
महादेवा ओ महादेवाः,महादेवा ओ
महादेव ओ महादेवाः,जगतीस्त्वं चलयित्वा,
शिवा मे ही महादेवाः,शिवा मे ही महादेवाः
महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः--------- (०३)
महादेवा ओ महादेवाः,महादेवा ओ
महादेवा ओ महादेवाः,गङ्गायां ते स्नानं,
शिवा मे ही महादेवाः,शिवा मे ही महादेवाः
महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः--------- (०४)
महादेवा ओ महादेवाः,महादेवा ओ
महादेवा ओ महादेवाः,सुखदुःखानां दाता
शिवा मे ही महादेवाः,शिवा मे ही महादेवाः
महादेवा ओ महादेवाः,देवानाम् ओ देवाः,शिवा मे ही महादेवाः---- (०५)

रचयिता - डा.रुरुकुमारमहापात्रः(अध्यापकः)
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

# संस्कृतविद्यास्थानानि- ५१
# ज्योतिषस्य त्रयः स्कन्धाः-



हिमसंस्कृतवार्ताः,
श्री अभिजित् तोडकर 9145908156

विषयवस्तु अधिकृत्य ज्यौतिषस्य त्रयः विभागाः सन्ति- सिद्धान्तः, संहिता, होरा च। त्रुटितः आरभ्य प्रलयं यावत् कालखण्डाः, सौरादीनि कालमानानि, ग्रहगतयः, ग्रहयुतिः, ग्रहनक्षत्रयुतिः, ग्रहाणामुदयास्ताः, चन्द्रसूर्यग्रहणानि, कृतस्य ग्रहगणितस्य परीक्षणार्थं च यन्त्रनिर्मितिः इत्यादयः सिद्धान्तस्कन्धविषयाः।

एतासां खगोलीयघटनानां जनेषु यः शुभाशुभादिप्रभावः तस्य चिन्तनं संहिताशाखायां भवति। उल्कापातभूकम्पादयः उत्पाताः तेषां प्रशमनं च, जलान्वेषणम्, तिथिनक्षत्रादीनां शुभाशुभत्वम्, यात्राविचारः, संस्काराणामनुष्ठानानां च कृते योग्यः कालः, वास्तुविद्या,रत्नपरीक्षा इत्यादयः बहवः विषयाः संहितायाम् अन्तर्भवन्ति। मुहूर्तविषयोपि संहिताविषयः एव। उक्तं च– कालः शुभक्रियायोग्यो मुहूर्तः इति कीर्तितः।

ग्रहनक्षत्राणां स्थितिवशात् व्यक्तौ तस्य शुभाशुभपरिणामः होरानामकस्य स्कन्धस्य विषयः। तत्र पुनः द्विविधः विभागः-- जातकम् इति विभागे गर्भाधानकालस्य अथवा जन्मसमयस्य ग्रहनक्षत्रादिस्थित्यनुसारं व्यक्तिसम्बद्धं शुभाशुभफलं चिन्त्यते। प्रश्नज्यौतिषे दैवज्ञम् उपसृत्य जनः यदि प्रश्नं पृच्छति तर्हि प्रश्नकालस्य ग्रहनक्षत्रादिस्थितिम् अनुसृत्य फलविचारो भवति।

वेदाङ्गज्यौतिषात् अनन्तरं सिद्धान्तस्कन्धे ब्राह्मः, सौरः, वासिष्ठः, लोमशः पौलिशः एते पञ्च प्रमुखसिद्धान्ताः उत्पन्नाः। तथापि तेषां ग्रन्थाः सम्प्रति नोपलभ्यन्ते। संहितासिद्धान्तौ प्राचीनौ स्कन्धौ होरा तु अर्वाचीनः। एतेषां त्रयाणामपि सद्यः उपलब्धाः केचन महत्त्वपूर्णग्रन्थाः–

## #सिद्धान्तस्कन्धः-

**1.आर्यभटीयम्-** आर्यभटः कुसुमपुरस्य निवासी आसीत्। तस्य कालः ख्रैस्तं पञ्चमं शतकम्। ग्रन्थस्यैतस्य त्रयो भागाः विद्यन्ते– गणितम्, कालक्रिया तथा गोलः। यथा नौकायां स्थितः मनुष्यः नदीतटस्थितान् वृक्षादीन् नौकायाः विलोममार्गेण गच्छन्तः पश्यति तथापि नक्षत्राणि अचलान्यपि भुवः गत्या पश्चिमाभिमुखं यान्तीव दृश्यन्ते इति सः वदति। आर्यभट्टीयं सिद्धान्तशास्त्रस्य उपलभ्यमानः प्राचीनतमः ग्रन्थः।

**२) पञ्चसिद्धान्तिका-**
अवन्तिनगरवासी वराहमिहिरः अस्य लेखकः। सः आर्यभटस्यैव समकालीनः। ब्राह्मादयः ये पञ्च सिद्धान्ताः तेषु केचन वराहमिहिरस्य काले एव नष्टप्रायाः आसन्। अवशिष्टेषु स्पष्टता नासीत्। अतः एतेषां सिद्धान्तानां मुख्यविषयान् सङ्गृह्य ग्रन्थमिदं निर्मितवान्।

### ३) सूर्यसिद्धान्तः-

एतस्य ग्रन्थस्य कर्ता अज्ञातः, तथापि सूर्यात् मयासुरेण एतत् ज्ञानं प्राप्तमिति उल्लेखात् एषः आर्षग्रन्थः स्यात् इति भाति। तथापि अभ्यासकाः एनं वराहमिहिरादपि अर्वाचीनं मन्यन्ते। चन्द्रः मेघवत् सूर्यमाच्छादयति तेन सूर्यग्रहणं भवति, चन्द्रः यदा पृथिवीच्छायायां प्रविशति तदा चन्द्रग्रहणं भवति इत्यादयः महत्त्वपूर्णाः अंशाः ग्रन्थेस्मिन् विवेचिताः।

**४) सिद्धान्तशिरोमणिः-**
एतस्य कर्ता भास्कराचार्यः। ख्रैस्ते ११४९ तमे वर्षे ग्रन्थमेनं लिखितवानिति तेनैव कृतात् शकोल्लेखात् निश्चितं भवति। ब्रह्मदत्तस्य ब्राह्मस्फुटसिद्धान्तः इत्येनं ग्रन्थम् आधारीकृत्य अहम् एनं ग्रन्थं रचितवान् इति सः कथयति। सिद्धान्तज्यौतिषविषयकाः सर्वेऽपि महत्त्वपूर्णाः अंशाः ग्रन्थेऽस्मिन् सम्यक् प्रतिपादिताः सन्तीत्यतः एतस्य ग्रन्थस्य अध्ययनं विना सिद्धान्तस्कन्दस्य ज्ञानं दुष्करम्।

## संहितास्कन्धः-

**१) बृहत्संहिता–**
वराहमिहिरस्य एषा अन्तिमा कृतिः। ग्रन्थेऽस्मिन् संहितान्तर्गताः सर्वे महत्त्वपूर्णविषयाः हृद्यशैल्या निरूपिताः सन्ति। ग्रन्थेऽस्मिन् १६० अध्यायाः सन्ति। तथापि संहितान्तर्गतयोः यात्रा तथा मुहूर्तः एतयोः विषययोः विवेचनम् अत्र नास्ति। ग्रन्थेऽस्मिन् पराशर- गर्ग- भृगु- मयादीनां तेन कृतात् उल्लेखात् ज्ञायते यत् संहिताशास्त्रस्य बहवः ग्रन्थाः पूर्वमासन् तथापि सद्यः ते नोपलब्धा एव। अग्रेऽपि केवलं मुहूर्तविषयकाणामेव ग्रन्थानां विस्तरः जातः। अतः संहितास्कन्धस्य ज्ञानाय बृहत्संहितायाः महत्त्वं सर्वोपरि अस्ति।

**२) मुहूर्तचिन्तामणिः-** मुहूर्तग्रन्थेषु एषः सर्वोत्तमः ग्रन्थः रामनाम्ना दैवज्ञेन षोडशशतके निर्मितः।

**#होरास्कन्धः-**

**१) बृहत्पाराशरहोराशास्त्रम्–**
एषः पाराशरमैत्रेयसंवादरूपः ग्रन्थः पश्चाद्भाविना केनचित् दैवज्ञेन सङ्गृह्य लिखितः। अस्य उपसंहाराध्याये होराशास्त्रस्य ब्रह्मा नारदः शौनकः पराशरः मैत्रेयः एवं परम्परा उक्ता अस्ति। ग्रन्थेस्मिन् ९८ अध्यायाः सन्ति।

**२) बृहज्जातकम्–** एतस्य कर्ता वराहमिहिरः एव। एतस्मिन् पञ्चविंशतौ अध्यायेषु होरासम्बद्धाः सर्वेपि विषयाः स्पष्टतया निरूपिताः।

# पशुपतिनाथधामे


## महाशिवरात्रिः उत्सवः

हिमसंसकृतवार्ताः शिवराजभट्टः,नेपालम्

नेपालदेशे काठमाण्डूमण्डले मध्यभागे महापुण्या वाग्वतितीरे वागमतितीरे वा स्थितं पशुपतिनाथमन्दिरं महत्त्वपूर्णं ऐतिहासिकं, धार्मिकं, सास्कृतिकं, स्थलं च अस्ति । पशुपतिनाथमन्दिरक्षेत्रे स्थितानि मठमन्दिराणि, पूजास्थानानि, मूर्तयः, ऐतिहासिकशिलालेखाः इत्यादयः बह्वयः पुराकलाकृतयः सम्पतयः मुक्तसङ्ग्रहालयः च स्थानमिदं प्राचीनतमं सिद्धं कुर्वन्ति । पशुपतिनाथः न केवलं हिन्दूनाम् भक्तिभावस्य केन्द्रः अस्ति अपितु शैवानाम् , शाक्तानाम्, वैष्णवानाम्, जैनानाम्, सौर्याणाम्, गाणपतानाम्, सिख्खानाम् इत्यादिनां बहुनाम् सम्प्रदायानाम् समानास्था भक्तिभावस्य च केन्द्रबिन्दु रुपेण विभाति । अत्र हिन्दुजनाः जन्मतः मृत्युपर्यन्तं मानवस्य आवश्यकाः सर्वे संस्काराः कर्तुं शक्नुवन्ति । हिन्दवतिरिच्य अन्यजनाः अस्मिन् मन्दिरे प्रवेशं कर्तुं न शक्नुवन्ति । ऐतिहासिक-सांस्कृतिकरुपेण यूनेस्को-संस्थायाः प्राचीनसांस्कृतिकः विश्वधरोहरस्थलरूपेणः सूचीकृतं पशुपतिनाथमन्दिरं त्रिभुवन-अन्तर्राष्ट्रीयः विमानस्थलतः सम्भवतः पञ्चकिलोमीटर दूरे अवस्थितः अस्ति ।

प्रतिवर्षं पशुपतिनाथधामे बालाचतुर्दशीशिवरात्रिञ्च द्वे पर्वे मुख्यरुपेण आयोजयितुं भक्तजनाः अत्र समागच्छन्ति । मार्गशीर्षमासस्य कृष्णचतुदशीतिथौ बालाचतुर्दशी इति नाम्ना प्रसिद्धा अस्ति अस्मिन् पर्वणि पशुपतिनाथमन्दिरे बृहन्मेला भवति । तदा नेपालात् बहुषुस्थानेभ्यः आगताः भक्तजनाः बालाचतुर्दश्यांरात्रौ पशुपतिनाथमन्दिरं परितः उपविश्य रात्रौ जागरणं कृत्वा परिवारान्तर्गतस्य दिवंगतात्मनः मोक्षं कामयन्तः स्वर्गलोकं कामयन्तः दीपदानं भजनकीर्तनं जपध्यानं नमस्कारं प्रदक्षिणम् इत्यादि कृत्वा शतवीजं वपन्ति ।

अपरः उत्सवः फाल्गुनकृष्णचतुर्दशी यत् महाशिवरात्रिपर्वम् इति नाम्नापि प्रसिद्धम् अस्ति । शिवरात्रिः हिन्दुधर्मानुयायिनां प्रियः व्रतम् तथा संकटापन्नानां दीनदुःखीनां प्राणिनाम् हृदये यः शिवः धर्मस्य उदयं करोति तस्य भगवतः देवाधिदेवमहादेवस्यापि प्रिय व्रतम् अस्ति । अस्मिन अवसरे आराध्यदेवाधिदेवपशुपतिनाथमन्दिरे महाशिवरात्रिः अवसरे वृहद् मेला लगति । अस्मिनवसरे भारतात् , बङ्लादेशात्, भूटानात्, म्यान्मारात्,थाइलैण्डात् बहवः सनातनिहिन्दुधर्मालम्बीनः सन्तजनाः भक्तजनाः दर्शनार्थं दानपुण्यार्थं जपध्यानपुजार्चनार्थं अत्र समागच्छन्ति । पुराकाले फाल्गुनमासेकृष्णचतुर्दशीदिने अर्धरात्रौ दुःखदारिद्रापन्नानां जनानामुद्धारं कर्तुं स्वयं देवाधिदेवः भगवान् शिवः लिङ्गः रुपेण प्रकटं बभूव । तदा ब्रह्मविष्णुभ्यां पूजार्चनं चक्रतुः तदर्थं अस्मिन् दिने महाशिवरात्रिपर्वरुपेण लोकाः तं पूजयन्ति इति बहुषु पुराणेषु वर्णनमस्ति । हिन्दवः बहुनि व्रतानि उत्सवानि आचरन्ति परं तेषाम् मध्ये महाशिवरात्रिव्रतं श्रेष्ठतमं मन्यन्ते । महाशिवरात्रिदिने भक्तजनाः शिवालये भगवतः शिवस्य प्रियवस्तुभिः दुग्धैः, दधिभिः,मधुभिः,आज्यैः बिल्वपत्रैः पूजार्चनं कृत्वा उपवासजागरणमञ्च कुर्वन्ति । अस्मिन् महोत्सवदिने भक्तजनाः भक्तिभावेनोपवासं कृत्वा सर्वान् सिद्धिलाभान् प्राप्नुवन्ति , जीवनान्ते शिवसन्निधिं प्राप्नुवन्ति इति धार्मिकः विश्वासः अस्ति । अयं दिवसः पशुपतिनाथमन्दिरे रात्रौ चतुर्यामेषु चतुर्विधपूजार्चनं भवति एतदतिरिक्तः लोकाः नेपालस्य राष्ट्रियएवंसांस्कृतिकपर्वः रुपेणापि मन्यन्ते । मन्दिरे महादीपं प्रज्वालनम्, अखण्डदीपः प्रज्वालनं, लक्ष्यदीपः प्रज्वालनम् , दीपोत्सवः सह लक्षशः बिल्वपत्राणि च अर्पयन्ति ।




### पुराणेषु पशुपतिनाथस्य वर्णनम्

श्रीमन्महाशिवपुराणे तथा लिङ्गपुराणे भगवान् शिवः पुरातनसमये पशुपतिनाथः नाम्नः प्रसिद्धः आसीत् इति कथनमस्ति । पशुपति नाम विषये श्रीमद्लिंङ्गमहापुराणे उत्तरभागे नवमोऽध्याये “ब्रह्माद्याः स्थावरांताश्च देवदेवस्य धीमतः।। पशवः परिकीर्त्यंते संसारवशवर्तिनः।। तेषां पतित्वाद्भगवान् रुद्रः पशुपतिः स्मृतः।।” इति वर्णनमस्ति । एवं प्रकारेण श्रीमद्शिवमहापुराणे सप्तम्यां वायवीयसंहितायामुत्तरखंडे द्वितीयोऽध्याये उपमन्यु पशुपति कथं पशुपति बभूव विषये पशुपतिनाथस्य वर्णनं करोति “ब्रह्माद्याः स्थावरांताश्च देवदेवस्य शूलिनः ॥ पशवः परिकीर्त्यंते संसारवशवर्तिनः ॥ तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः ॥” अनादि निधनो धाता सृष्टिसंहारकारकः पशुपति तान् सर्वान् पशुन् चतुर्विंशतितत्वानि मायाकर्मगुणा विषयाः मलमायादिभिः पाशै निबन्धनाति । तसर्थः ते सर्वे पशवः कथ्यते यः पाशैः वध्नाति सः पशुनाम् पति पशुपति इति कथ्यते । यः देवाधिदेवंपशुपतिनाथं सम्यगुपासति तान् पाशात् मोचयति तस्मात् भक्तानुग्रहकारकः पशुपति पाशं मोचकोऽपि अस्ति । पशुनामपति देवाधिदेवः महेश्वरः ब्रह्मादिस्तम्बपर्यंतान् स्वपशून् विषयरुपिणपाशै बद्ध्वा मलमायादिभिः स्वकार्यंकारयति । “ये मां पशुपतिं देवा द्रक्ष्यन्ति मनुजा भुवि पशुजन्म न तेषां तु मत् प्रसादाद्भविष्यति ।।” इति स्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये प्रथमोऽध्याये वर्णनमस्ति । श्रीस्वस्थान्यां कथायाम् उल्लिखितायाः तथा अन्यकथायाः अनुसारं भगवान् शिवः मृगरूपं स्वीकृत्य पार्वती सह श्लेष्मन्तकवने न्युवास तस्मात् कारणात् भगवान् शिवः पशुपति इति नाम्नः प्रसिद्धः बभूव ।

### पशुपतिनाथस्य शिवलिंगः शिराकृतियुक्तः

द्वादश ज्योतिर्लिंगाः भिन्नाकाराः दृष्यन्ते परन्तु कुत्रापि शिवलिंगः शिराकृतियुक्तः नास्ति । पशुपतिनाथमन्दिरे ज्योतिर्लिंगं शिराकृतियुक्त अस्ति । पशुपतिनाथः सर्वेषुज्योतिर्लिंगाणां एकेव शिररुपेण वर्तते अतः महाज्योतिर्लिंगः इति कथ्यते । शिवपुराणस्य कोटिरुद्रसंहितायां केदारनाथ वर्णन प्रसंगे कथयति “नयपाले शिरोभागो गतस्तद्रूपतः स्थितः” भगवान् शिवः भारतेउत्तराखण्डप्रदेशे केदारनाथे शिवः पृष्ठभागरूपेण तथा तस्य शिरःभागरूपेण पशुपति नेपालदेशेकाठमाण्डौमण्डले प्रादुर्बभूव इति वर्णनमस्ति । तस्मात् शीरभागं अर्थात् पशुपतिनाथलिङ्गं महाज्योतिलिङ्गं कथ्यते । द्वादशः ज्योतिलिङ्गाः न क्वापि स्वयम् प्रादुर्भुता आसन् ते सर्वे स्थापितानि ज्योतिलिङ्गानि आसन् परन्तु पशुपतिनाथस्य शिवलिङ्ग स्वयम् प्रादुर्बभव तस्मात् कारणात् पशुपतिनाथस्य लिङ्ग महाज्योतिलिङ्ग कथ्यते । अज्ञानि जनाः अर्धज्योतिलिङ्गं अपि वदन्ति परन्तु यथा अग्नि अर्ध नभवति तथैव ज्योतिलिङ्गं अपि अर्ध नभवति परन्तु महाज्योतिलिङ्ग भवितुम सक्यते ।

### राजपरिवारस्य सदस्यानाम् इष्टदेवः

राजसंस्थास्थापनाकालात् पशुपतिनाथः नेपालस्य राजपरिवारसदस्याः स्वः ईष्टदेवः रुपेण पूजयन्ति । तस्मात् पशुपतिनाथमन्दिरं निर्माण मर्मतसम्भारिकार्ये राजपरिवारस्य महत्वपूर्ण योगदानम् अस्ति । नेपालस्य प्राचीनतमे तिहासे “गोपालराज वंसावली” इत्यस्य अनुसारं लिच्छवीराजा सुपुष्पदेवः पशुपतिनाथमन्दिरं निर्ममौ इति वर्णनमस्ति । अन्यस्य वंशाल्यां सुपुष्पदेवस्य पञ्चतलां पशुपतिनाथमन्दिरस्य निर्माणात् पूर्वं तस्मिन् स्थाने शिवलिङ्गाकारं मन्दिरम् आसीत् इति वर्णनम् अस्ति । यथा कालमतिते तथा ते सर्वे राजा मन्दिरस्य मर्मतादिकार्यं चक्रुः । अतःएव नेपालस्य मध्ययुगीनराजा शिवदेवः पशुपतिनाथमन्दिरस्य पुनर्निर्माणं जिर्णोद्धारमादि कार्यं चकार । पश्चात् मल्लराजानमपि मर्मतसंम्भारादि कार्यं कृत्वा मन्दिरे गजुरस्य स्थापना चकार।

अयं शिवलिङ्गः अतीव बहुमूल्यः चमत्कारिकः पारस धातुना निर्मितमस्तीति लोकाः मन्यन्ते । अस्मिन् ज्योतिर्लिङ्गस्य पञ्चमुखानां पृथकगुणाः सन्ति । अस्य शिवलिङ्गस्य चतुर्दिक्षु एकमेकं मुखं एवं एकं ऊर्ध्वदिशि मुखं दरिदृष्यते । दक्षिणाभिमुखं अघोरः नाम्नः प्रसिद्धः अस्ति । पश्चिमाभिमुखं सद्योजातः नाम्नः प्रसिद्धः अस्ति पूर्वोत्तरमुखं तत्पुरुषः नाम्नः प्रसिद्धः अस्ति उत्तरदिशिमुखं अर्धनारीश्वरः नाम्नः प्रसिद्धः अस्ति । उर्ध्वदिशि इशानः नाम्नः प्रसिद्धः अस्ति । इदं निराकारं मुखं भगवतः पशुपतिनाथस्य श्रेष्ठतमं मुखम् मन्यन्ते । प्रत्येकं मुखस्य अधोभागे दक्षिणहस्ते रुद्राक्षमाला, वामे हस्ते कमण्डलुं च धारयन्त्यः रुपं दरिदृष्यते । केचित जनाः शिवलिङ्गस्य चत्वारः मुखाः चत्वार वेदाः रुपेणापि मन्यन्ते ।

### महामृत्युंजय मंत्रस्य अर्थम्

**ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ**
**त्र्यम्बकं यजामहे सुगन्धिं**
**पुष्टिवर्धनम् उर्वारुकमिव**
**बन्धनान् मृत्योर्मुक्षीय मामृतात्**
**ॐ स्वः भुवः भूः ॐ सः जूं हौं**
**ॐ!!**

महामृत्युञ्जयमन्त्रस्य अर्थम्-

त्रयम्बकम्- यस्य त्रीणि नेत्राणि सन्ति।
यजामहे- वयं पूजयामः आदरयामः च।
सुगन्धिम्- मधुरगन्धयुक्तः सुगन्धितः च।
पुष्टि- प्रफुल्लितः व्यक्तिः।
वर्धनम्- यः पोषयति बलं ददाति च।
उर्वारुकम्- कर्कटी।
इव - यथा एव।
बन्धनात् - वस्तुतः अन्त्यात् दीर्घतरम्।
मृत्योः- मृत्युतः
मुक्षीय- अस्मान् मुक्तं कुरुत।
मा- निषेधात्मक
अमृतात्- अमरता, मोक्षः।

------------

**सरलार्थम् अस्ति यत्**

------------

वयं त्रिनेत्रशिवं पूजयामः, यः प्रत्येकं प्राणिनि प्राणं प्रवेशशति, सम्पूर्णविश्वं पोषयति च।

